# Jayantasya Shvitraroganivarana Varnanam

# જયન્તસ્ય શ્વિત્રરોગનિવારણવર્ણનમ્

## Document Information

Text title : Jayantasya Shvitraroganivarana Varnanam

File name : jayantasyashvitraroganivAraNavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 34|| 38-55||

Latest update : June 18, 2023

Send corrections to : sanskrit at cheerful dot c om


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

Jayantasya Shvitraroganivarana Varnanam

# જયન્તસ્ય શ્વિત્રરોગનિવારણવર્ણનમ્

(શિવગૌરીસંવાદે)

ઈશ્વરઃ -

પુરા જયન્તઃ શક્રસ્ય તનયો મોહમાસ્થિતઃ ।
ઐરાવતસુતં નાગં સમારુહ્ય જવાત્તદા ॥ ૩૮॥

સમાગતો દેવગણૈર્મધ્યેમાર્ગં દ્વિજસ્ય હિ ।
ગોવત્સો મર્દિતઃ પાદૈસ્તેનોન્મત્તેન હસ્તિના ॥ ૩૯॥

શતર્ચનઃ શશાપૈનં જયન્તં પાકશાસનિમ્ ।
શ્વિત્રી ભવેતિ ચ તદા શાપાચ્છ્વિત્ર્યભવત્તદા ॥ ૪૦॥

ઇન્દ્રમિન્દ્રગુરુઃ ગત્વા તત્સર્વં શાપકારિતમ્ ।
જયન્તઃ પ્રાહ દુઃખેન પ્રણમ્ય પિતરં ગુરુમ્ ॥ ૪૧॥

—

જયન્તઃ -

અજ્ઞાનાદ્યૌવનોન્માદાદ્ધસ્તિપાદાવમર્દિતઃ ।
તર્ણકસ્તસ્ય વિપ્રસ્ય ક્રુદ્ધો મયિ શતર્ચનઃ ॥ ૪૨॥

તસ્યાદ્ય નિષ્કૃતિં બ્રૂતં યુવાં યદ્બ્રૂત તદ્વ્રતમ્ ।
કરિષ્યામિ ન સન્દેહઃ સુખોપાયં વદાધુના ॥ ૪૩॥

—

ઈશ્વરઃ -

જયન્તવાક્યં તચ્છ્રુત્વા શક્રસ્યાનુમતે પુનઃ ।
બૃહસ્પતિસ્તદા પ્રાહ પ્રભાસં ક્ષેત્રમુત્તમમ્ ॥ ૪૪॥

સિદ્ધેશ્વરં પ્રણમ્યાથ સ્નાત્વા વેણાનદીજલે ।
સંવત્સરં વસ પ્રીત્યા જપ રુદ્રં મહેશ્વરમ્ ॥ ૪૫॥

બિલ્વપત્રૈઃ સમભ્યર્ચ્ય મુક્તો ભવસિ નાન્યથા ।

તદા ગુરુવચઃ શ્રુત્વા જયન્તસ્તૌ પ્રણમ્ય ચ ॥ ૪૬॥

ઇન્દ્રેણ ચાભ્યનુજ્ઞાતઃ પ્રભાસે માં સમાગતઃ ।
સ્નાત્વા વેણાનદીતોયે તપોઽતપ્યત દુષ્કરમ્ ॥ ૪૭॥

ભસ્મત્રિપુણ્ડ્રરુદ્રાક્ષમાલાલઙ્કૃતવિગ્રહઃ ।
નમસ્કારૈર્મહાદેવં રુદ્રાધ્યાયેન શઙ્કરમ્ ॥ ૪૮॥

શક્રાત્મજસ્તદા ગૌરિ સિદ્ધેશાખ્યં તદા મુદા ।
બિલ્વપત્રૈઃ સમભ્યર્ચ્ય પ્રદક્ષિણપુરઃસરમ્ ॥ ૪૯॥

સ્તુવન્ જપન્ સદા ધ્યાયન્ માં નિરીક્ષંશ્ચ ભક્તિતઃ ।
તુષ્ટાવાથ જયન્તો માં પ્રણિપત્ય કૃતાઞ્જલિઃ ॥ ૫૦॥

—

જયન્તઃ -

સિદ્ધીનાં નિલયસ્ત્વમીશ દયયા આગસ્કૃતં પાહિ માં
વિશ્વાધીશ્વર વિશ્વનાથ ભગવન્ શ્રીચન્દ્રચૂડ પ્રભો ।
ત્વં શક્રાદિસુરાસુરાર્ચિતપદો નિર્દ્વન્દ્વનિત્યો વિભુઃ
ગુપ્તો મૂઢધિયાં સુસૂક્ષ્મકધિયા પશ્યન્તિ યં યોગિનઃ ॥ ૫૧॥

સાન્દ્રાનન્દમયં દયામયતનું પ્રાપ્તોઽસ્મિ પાદં તવ ।
માં સદ્યઃ સુખયાશુ પાહિ દયયા સિદ્ધેશ ભદ્રં કુરુ ॥ ૫૨॥

—

ઈશ્વરઃ -

ઇતિ સમ્પ્રાર્થિતસ્તેન જયન્તેન મનોરમે ।
તસ્માચ્છ્વિત્રાદ્વિનિર્મુક્તો નત્વા શક્રં મુદા ગતઃ ॥ ૫૩॥

ઇત્થં પ્રભાસક્ષેત્રસ્ય મહિમાયં તવોદિતઃ ।
સિદ્ધિપ્રદમિદં ક્ષેત્રં સિદ્ધેશસ્યાસ્ય દર્શનાત્ ॥ ૫૪॥

—

સૂતઃ -

શિવપ્રણતિસમ્ભવં ફલમપારપુણ્યાધિકં
ન તત્ ક્રતુશતાર્જિતૈઃ ફલગણૈઃ સમાનં ભવેત્ ।
અનન્તમહિમાસ્પદં વિવિધપાતકોચ્છેદકં
શિવદ્રુહિ જને સદા ન ખલુ વાચ્યમેતદ્ દ્વિજૈઃ ॥ ૫૫॥

—

॥ ઇતિ શિવરહસ્યાન્તર્ગતે પ્રભાસક્ષેત્રમાહાત્મ્યે જયન્તસ્ય શ્વિત્રરોગનિવારણવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૩૪ ॥ ૩૮-૫૫ ॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 34.. 38-55..

Notes:
Prabhas Shiva Kshetra, is abode to Siddheshwara (Siddhesha) Linga and is located on the banks of River Vena (Venika). Shakra's (Indra's) son - Jayanta, incurred leucoderma after a calf got killed while he (Jayanta) was racing around on the Elephant Airavat. Jayanta was relieved of the illness after due repentance in Prabhas Kshetra, as advised by Devaguru Brihaspati. Shiva iterates that worship at Siddheshwara Linga, promptly bestows Siddhies.

The shloka numbers have been maintained per the source text.

Proofread by Ruma Dewan

---

*Jayantasya Shvitraroganivarana Varnanam*
pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*